वन, कि उपकृतिशब्दाघातशब्दोपतापेषु। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-अक०च-सेट्।) कि, वानयति वनति। अयं केश्चिन्न मन्यते। इति दुर्गादासः॥

वन, द इ उ याचे। इति कविकल्पद्रुमः॥ (तना०-आत्म०-द्विक०-सेट्। उदित्त्वात् क्त्वावेट्।) द ङ, वनुते। उ, वनित्वा वत्वा। इति दुर्गादासः॥

वनं, क्ली स्त्री, (वनतीति। वन्+पचाद्यच्। यद्वा, वन्यते सेव्यते इति। "पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) बहुवृक्षयुक्तस्थानम्। (यथा, मनुः। ८। ३५६।

"परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा।
नदीनां वापि सम्भेदे स संग्रहणमाप्नुयात्॥"

स्त्रियान्तु यथा, साहित्यदर्पणे आर्य्ययाञ्जनायाम्।

"कान्तो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु
दूरेपतिः कथय किं करणीयमद्य॥")

तत्पर्य्यायः। अटवी २ अरण्यम् ३ विपिनम् ४ गहनम् ५ काननम् ६। इत्यमरभरतौ॥ दावः ७ दवः ८ अटविः ९ भीरुकम् १० झाटम् ११ गुहिनम् १२। इति शब्दरत्नावली॥ ग्रहम् १३ समजम् १४ प्रान्तरम् १५ त्रिक्तम् १६॥ इति जटाधरः॥ कान्तारम् १७। इति राजनिर्घण्टः॥ * ॥ गृहसमीपकर्त्तव्यवनं यथा,—

"शिविराभ्यन्तरे भद्रा स्थापिता तुलसी शुभाम्।
धनपुत्त्रप्रदात्री च पुण्यदा हरिभक्तिदा।
प्रभाते तुलसीं दृष्ट्वा स्वर्णदानफलं लभेत्॥
मालती यूथिका कुन्दं माधवी केतकी तथा।
नागेश्वरं मल्लिका च काञ्चनं वकुलं शुभम्॥
अपराजिता च शुभदा तेषामुद्यानमीप्सितम्।
पूर्व्वे च दक्षिणे चैव शुभदं नात्र संशयः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०२ अध्यायः॥

मथुरायां द्वादश वनानि यथा,—

"रम्यं मधुवनं नाम विष्णुस्थानमनुत्तमम्।
तद्दृष्ट्वा मनुजो देवि सर्व्वान् कामानवाप्नुयात्॥
वनं तालवनञ्चैव द्वितीयं वनमुत्तमम्।
तत्र स्नात्वा नरो देवि कृतकृत्यो हि जायते॥
तृतीयं कुमुदं नाम वनं चैवोत्तमं तथा।
तत्र गत्वा नरो देवि कृतकृत्यो हि जायते॥
एकादश्यां कृष्णपक्षे मासि भाद्रपदे हि या।
तत्र स्नातो नरो देवि रुद्रलोके महीयते॥
चतुर्थं काम्यकवनं वनानां वनमुत्तमम्।
तत्र गत्वा नरो देवि मम लोके महीयते॥
विमलस्य च कुण्डे तु सर्व्वैः पापैः प्रमुच्यते।
यस्तु प्रमुञ्चते प्राणान् मम लोकं स गच्छति॥
पञ्चमं वकुलवनं वनस्थानमनुत्तमम्।
तत्र गत्वा नरो देवि अग्निस्थानं स गच्छति॥
यमुनायाः परे पारे देवानामपि दुर्लभम्।
अस्ति भद्रवनं नाम षष्ठं वनमनुत्तमम्॥
तत्र गत्वा तु वसुधे मद्भक्तो मत्परायणः।
तद्वनस्य प्रभावेण नागलोकं स गच्छति॥
सप्तमन्तु वनं भूमे खादिरं लोकविश्रुतम्।
तत्र गत्वा नरो भद्रे मम लोकं स गच्छति॥
महावनं चाष्टमन्तु सदैव तु मम प्रियम्।
तस्मिन् स्नात्वा तु मनुजो इन्द्रलोके महीयते॥
लोहजं धवलं नाम लोहजङ्घेन रक्षितम्।
नवमन्तु वनं देवि महापातकनाशनम्॥
वनं विल्ववनं नाम दशमं देवपूजितम्।
तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते॥
एकादशन्तु भाण्डीरं योगिनां प्रियमुत्तमम्।
तस्य दर्शनमात्रेण नरो गर्भं न गच्छति।
भाण्डीरं समनुप्राप्य वनानां वनमुत्तमम्॥
वासुदेवं ततो दृष्ट्वा पुनर्जन्म न विद्यते॥
वृन्दावनं द्वादशमं वृन्दया परिरक्षितम्।
मम चैव प्रियं भूमे महापातकनाशनम्॥
वृन्दावनन्तु गोविन्दं ये पश्यन्ति वसुन्धरे।
न ते यमपुरं यान्ति वैकुण्ठं प्राप्नुयुर्नराः॥"

इति वाराहे मथुरातीर्थवनद्वादशकवर्णनं नामाध्यायः॥ * ॥ वनविशेषे मरणफलं यथा,—

"यदेतत् कथितं पुण्यं मया ब्रह्मसुखावृतम्।
तत् समग्रं भवेत्तस्य अरण्येष्वपरेषु च॥
अरण्यानि प्रवक्ष्यामि तथा चैवोषराणि च।
सैन्धवं दण्डकारण्यं नैमिषं कुरुजाङ्गलम्॥
उपलावृतमारण्यं जम्बूमार्गोऽथ पुष्करम्।
हिमवांस्ततोऽरण्य उत्तमः परिकीर्त्तितः॥
नवस्वेतेष्वरण्येषु यस्तु प्राणान् परित्यजेत्।
ब्रह्मलोकातिथिर्भूत्वा स याति परमं पदम्॥"

इति देवीपुराणे अरण्योषरप्रशंसा॥ * ॥
अरण्ये वर्णनीयानि यथा,—

"अरण्येऽद्विवराहेभयूथसिंहादयो द्रुमाः।
शुककाककपोताद्या भिल्लभल्लदवादयः॥"

उद्याने वर्णनीयानि यथा,—

"उद्याने सरणिः सर्व्वफलपुष्पलताद्रुमाः।
पिकालिकेकिहंसाद्याः क्रीडावाप्यध्वगस्थितिः॥"

इति कविकल्पलतायाम् १ स्तवके ३ कुसुमम्॥
(शङ्कराचार्य्यशिष्यस्य हस्तामलकस्य शिष्याणामुपाधिविशेषे, पुं। यदुक्तं प्राणतोषिण्यामवधूतप्रकरणे।

"सुरम्ये निर्झरे देशे वने वासं करोति यः।
आशापाशविनिर्मुक्तो वननामा स उच्यते॥")

वनं, क्ली, (वन्यते सेव्यते इति। वन्+"पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। घः। इति निघण्टौ देवराजयज्वा। १।१२।६।) जलम्। (यथा, रघुः। ६। २२।

"नमयति स्म स केवलमुन्नतं
वनमुचे नमुचेररये शिरः॥")

निवासः। आलयः। इति मेदिनी। ने, १६॥ (यथा, ऋग्वेदे। २। १४। ६।

"अध्वर्य्यवः कर्त्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम्॥"

"वने संभजनीये वने उदके निपूतमाप्यायनेन शोधितं सोममस्मयध्वमूर्द्धं नयत। यद्वा वने तद्विकारे चमसे निपूतं दशापवित्रेण शोधितं सोमं वने चमसे उन्नयध्वम्।" इति तद्भाष्ये सायणः॥) प्रस्रवणम्। इति हेमचन्द्रः॥ (रश्मिः। इति निघण्टुः। १।५।८॥ "वन षण सम्भक्तौ भ्वादिः परस्मैपदी। पुंसि संज्ञायां घः। वन्यते सेव्यते शीतादिनिवारणाय। अथवा वनतिर्हिंसार्थः। वन्यते हिंस्यतेऽनेन तमः। यद्वा, वनु याचने तनादि आत्मने भाषा। वन्यते याच्यते वृष्टिप्रदानाय। यद्वा, वनशब्दे भ्वादिः परस्मैपदी वन्यते शब्द्यते स्तूयते स्तोतृभिः।" इति तत्र देवराजयज्वा॥ यथा, ऋग्वेदे। १। २४। ७।

"अबुध्ने राजा वरुणो वनस्य॥")

वनकदली, स्त्री, (वनोद्भवा कदली।) काष्ठकदली। इति राजनिर्घण्टः॥ (विवृतिरस्याः काष्ठकदलीशब्दे ज्ञातव्या॥)

वनकन्दः, पुं, (वनजातः कन्दः।) वनसूरणः। अरणीकन्दः। इति राजनिर्घण्टः॥

वनकार्पासी, स्त्री, (वनोद्भवा कार्पासी।) वनोद्भवकार्पासः। तत्पर्य्यायः। त्रिपर्णा २ भारद्वाजी ३ वनोद्भवा ४। इति रत्नमाला॥

वनकोलिः, स्त्री, (वनोद्भवा कोलिः।) वनबदरी। तत्पर्य्यायः। कर्कशिका २ फलकर्कशा ३। इति कोषान्तरम्॥

वनगोचरः, पुं, (वनं गोचरो देशो यस्य।) व्याधः। इति केचित्॥ (वनं जलं गोचरो निवासस्थानं यस्य। नारायणः। इति भागवतटीकायां श्रीधरस्वामी। ३। १८। ३॥ त्रि, जलचरः। यथा, भागवते। ३। १८। २।

"मुष्णन्तमक्ष्णा स्वरुचोऽरुणश्रिया
जहास चाहो वनगोचरो मृगः॥"

काननविहारी। यथा, मनुः। ८। २५९।

"सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्।
इमानप्यनुयुञ्जीत पुरुषान् वनगोचरान्॥")

वनगौः, स्त्री, (वनस्य गौः।) गवयः। इति राजनिर्घण्टः॥

वनचन्दनं, क्ली, (वनजातं चन्दनम्।) अगुरु। देवदारु। इति विश्वः॥

वनचन्द्रिका, स्त्री, (वने चन्द्रिका ज्योत्स्नेव।) मल्लिका। इति राजनिर्घण्टः॥

वनचम्पकः, पुं, (वनजातश्चम्पकः। शाकपार्थिववत् समासः।) वनजचम्पकपुष्पवृक्षः। तत्पर्य्यायः। वनदीपः २ हेमाङ्गः ३ सुकुमारः ४। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। वातकफनाशित्वम्। वर्ण्यत्वम्। चक्षुष्यत्वम्। व्रणरोपणत्वम्। वयःस्तम्भकारित्वञ्च। इति राजनिर्घण्टः॥